दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-317 | 1 | सितम्बर 12, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् आश्विन्कृष्णस्य पञ्चमी षष्ठी
भाद्रपद 27 प्रविष्टांशः मङ्गलमयः भवेत्

**2** कुत्र-कुत्र षष्ठवर्गात् विद्यालयप्रवक्तारः न पाठयन्ति, शिक्षानिदेशालयेन प्रतिवेदनं याचितम्

**3** बिहार-लोक-सेवा-आयोगस्य ७१तमायाः संयुक्त- (प्रारम्भिक) प्रतियोगिता-परीक्षायाः आयोजनस्य विषये संयुक्तवक्तव्ये निर्देशाः प्रदत्ताः

**4** श्रीमद्भागवतप्रवचनम्- ३० अस्य मण्डपस्य किञ्चिद् ऊर्ध्वभागे सप्तलोकाः परिकल्पनीयाः, तत्र च विरक्तविप्राः आहूय स्थापनीयाः।

## प्रधानमन्त्री नरेंद्रमोदी वाराणस्यां मॉरीशस-देशस्य प्रधानमंत्रिणा नवीनचंद्र-रामगुलाम इत्यनेन सह द्विपक्षीय वार्ताम् अकरोत्



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्री नरेन्द्रमोदी वाराणस्यां मॉरीशस-देशस्य प्रधानमंत्रिणा नवीनचंद्र-रामगुलाम इत्यनेन सह द्विपक्षीय वार्ताम् अकरोत् । वार्तायाः अनन्तरं द्वावेव देशौ विभिन्नक्षेत्रेषु चत्वारि सन्धिपत्राणि हस्ताक्षरितवन्तौ । अवधेयमस्ति यत् प्रधानमन्त्री रामगुलामः आध्यात्मिक नगरीं वराणसीं सम्प्राप्तवान् आसीत् । प्रधानमंत्री नरेन्द्रमोदी द्वयोः देशयोः मध्ये सुदृढसम्बन्धानं पुष्टीकुर्वन् प्रोक्तवान् यत्, "भारतं मॉरीशसं च राष्ट्रद्वयं, परञ्च आवयोः स्वप्नं एकम् एव । प्रधानमंत्री नरेन्द्रमोदी प्रोक्तवान् यत् भारत-मॉरीशस-राष्ट्रे न केवलं सहयोगिनौ अपितु संयुक्तपरिवारौ स्तः । सः प्रोक्तवान् यत् भारतं सदैव मॉरीशस इत्यस्य संप्रभुतायाः पूर्ण-मान्यताः, औपनिवेशीकरणस्य च समर्थनम् अकरोत् । प्रधानमंत्री नरेंद्रमोदी प्रोक्तवान् यत् भारतात् बहिः प्रथमं जनौषधिकेन्द्रं अधुना मॉरीशस-देशे स्थापितं वर्तते । सः प्रोक्तवान् यत् ऊर्जासुरक्षे द्विपक्षीय-सहयोगस्य महत्वपूर्णस्तंभौ स्तः । प्रधानमन्त्री नरेन्द्रमोदी इदमपि अकथयत् यत् आईआईटी-मद्रासः इत्यनेन इंडियन इंस्टीट्यूट-ऑफ़-प्लांटेशन-मैनेजमेंट इत्यनेन च मॉरीशस्-विश्वविद्यालयः इत्यनेन सह सन्धिपत्रं हस्ताक्षरितम् । द्वयोः नेत्र्योः मध्ये द्विपक्षीय वार्तायां सहयोगः सम्मिलितः जातः। द्वयोः देशयोः मध्ये विज्ञान-प्रौद्योगिकी-क्षेत्रेष चतुर्णा समुद्र-विज्ञान-प्रशासनिकप्रशिक्षणं-टेलीमेट्री-प्रभृतिषु सन्धिज्ञापनानाम् आदानं प्रदानं च सञ्जातम् । विद्युत्क्षेत्र-लघु-विकास-परियोजना-हाइड्रोग्राफी चेत्यादीनां क्षेत्राणां कृते भारतीयानुदान-साहाय्यस्य अपि आदानं प्रदानं च सञ्जातम् । अनया वार्तया भारत-मॉरीशस देशयोः मध्ये सभ्यतागत-संबंधानां, आध्यात्मिक-सम्बन्धानां परस्परजनसम्बन्धानां च स्थायिरूपेण पुष्टीकृता अस्ति । ध्यानास्पदं वर्तते यत् मॉरीशस-देशस्य प्रधानमंत्री सितम्बरमासस्य नवदिनाङ्कात् आरभ्य षोडश-दिनाङ्कपर्यन्तं भारतस्य साप्ताहिक्यां यात्रायाम् अस्ति ।

## पञ्च-विमानस्थानकेषु फास्ट ट्रैक इमिग्रेशन ट्रस्टेड-ट्रैवलर इत्यस्याः योजनायाः उद्घाटनं कृतवान् गृहमंत्री अमितशाहः



**हिमसंस्कृतवार्ताः** - गृहमंत्री अमितशाहः वीडियोकॉन्फ्रेंस इति दृश्य-श्रव्य माध्यमेन लखनऊ, तिरुवनंतपुरम, त्रिची, कालीकट, अमृतसर चेत्यादिषु विमानस्थानकेषु फास्ट ट्रैक इमिग्रेशन ट्रस्टेड ट्रैवलर इत्यस्याः योजनायाः उद्घाटनं कृतवान् । अस्य कार्यक्रमस्य उद्देश्यं तीव्र, सरलं, सुगमं आव्रजनस्वीकरणं अपि च सुगमा अन्तराष्ट्रिय-यात्रा अस्ति । अनेन अन्यदेशेभ्यः आगम्यमानेभ्यः भारतीयनागरिकेभ्यः प्रवासी-नागरिकेभ्यः च अधिक-सौविध्यं प्रदास्यते । अयं कार्यक्रमः स्वचालित-सीमा-द्वारेषु चलिष्यति अनेन आव्रजनप्रक्रिया मानवीयहस्तक्षेपं विना सरला भविष्यति । अस्मिन् अवसरे श्रीशाहः प्रोक्तवान् यत् फास्ट ट्रैक इमिग्रेशन इति कार्यक्रमः एकः विश्वसनीयः यात्रिकार्यक्रमः अस्ति, येन आव्रजनप्रक्रिया सरला, तीव्रा बाधारहिता भवति । श्री शाहवर्यः अवदत् यत् एषा योजना गतवर्षे नवदिल्लाम् आरब्धा आसीत्, अद्यावधि देशस्य त्रयोदश-विमानस्थानकेषु एषा सुविधा आरब्धा अस्ति । सः अकथयत् यत् अद्यावधि अस्मिन् सञ्जालपटले त्रि-लक्ष-यात्रिकाः पञ्जीकरणं कृतवन्तः । श्री शाहवर्यः अवदत् यत् गतेषु एकादशवर्षेषु अन्ताराष्ट्रिय-यात्रा वर्धिता अस्ति । चतुर्दशोत्तर-द्विसहस्रतमाब्दे विदेशं गच्छतां भारतीययात्रिकाणां सङ्ख्या चतुर्पञ्चाशत्-लक्षोत्तर-त्रि-कोटिपरिमिता, यत् अधुना त्रिसप्तति-प्रतिशतं संवर्ध्य प्रायः द्वादशलक्षोत्तर-षट्कोटिमिता अभवत् इति सः सूचितवान्।

## नेपालदेशे पूर्व-मुख्य न्यायाधीशा सुशीला कार्की भविष्यति अंतरिमा प्रधानमंत्री



हिमसंस्कृतवार्ताः - नेपालदेशे प्रवर्तमानस्य राजनैतिक-सङ्घर्षस्य मध्ये अंतरिम-सर्वकारः इत्यस्य नेतृत्वं सुनिश्चितं कर्तुं राष्ट्रपतिः रामचंद्र पौडेलः, नेपालस्य सेनाप्रमुखः अशोकराज-सिडेलः युवा-प्रतिनिधयः च वार्ता कृतवन्तः। प्राप्तसूत्रानुसारं युवान्दोलनकारिणां प्रतिनिधयः पूर्व-मुख्य न्यायाधीशं सुशीला कार्की इत्येतां अंतरिम प्रधानमंत्री पदाय प्रत्याशित्वेन विचिन्वन्तः । नेपालस्य सेनया सह युवान्दोलनकारिणां चर्चायां प्रत्यक्ष-रूपेण निर्वाचिता कार्यपालिका-प्रणाली, यूनां सम्मेलयितुं संघीय-संसदः निर्वाचनम्, नवाशीत्यधिक-नवदशशत-तमाब्दानन्तरं सार्वजनिकपदेषु आसीनानां अधिकारिणां संपत्तेः अन्वीक्षणं चेत्यादीनि प्रकरणानि सम्मिलितानि आसन् । सहैव भ्रष्टाचारप्रकरणानां न्यायिकान्वीक्षणं सांसदानां मन्त्रिपदाय निर्वाचनस्य निषेधं कर्तुं व्यस्थायाः आवश्यकता चेत्यादिषु विभिन्नविषयेषु चर्चा अभवत् ।

**सुभाषितम्**

विपदः संसारे बहुलाः,
दुःखकथा च नित्यम्।
करुणामयि! मां पालय,
भवसागरं तरणाय॥

भावार्थइस संसार में दु:ख बहुत हैं, हर दिन एक नई समस्या। हे करुणामयी मां! मुझे इस सागर से पार लगा दो।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्तयर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

## भारत-अमेरिकयोर्मध्ये व्यापारिक-सम्बन्धान् सुदृढं कर्तुं वार्ता गंभीररूपेण सकारात्मकरूपेण च अग्रे वर्धते – पीयूषगोयलः



हिमसंस्कृतवार्ताः - केंद्रीय-वाणिज्योद्योगमंत्री पीयूषगोयलः अकथयत् यत् भारत-अमेरिकयोर्मध्ये व्यापारिक संबंधान् सुदृढं कर्तुं वार्ता गंभीररूपेण सकारात्मकरूपेण च अग्रे वर्धते। अद्य पटनानगरे वार्ताहरैः सह सम्वादं कुर्वन् सः प्रोक्तवान् यत् भारत-अमेरिका-देशौ अधुना यावत् जातया प्रगत्या संतुष्टौ स्तः। श्रीगोयल अकथयत् यत् केंद्रीय मंत्रिमंडलेन ह्य स्वीकृताभिः मार्ग-रेल-अवसंरचना-परियोजनाभिः बिहारस्य विकासाय गतिः प्रदास्यते ।

# कुत्र-कुत्र षष्ठवर्गात् विद्यालयप्रवक्तारः न पाठयन्ति, शिक्षानिदेशालयेन प्रतिवेदनं याचितम्



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश-विद्यालयीय- शिक्षानिदेशालयेन षष्ठीतः द्वादशीपर्यन्तं छात्राणां शिक्षणसम्बद्धं प्रवक्तृभ्यः निर्गतनिर्देशानां अनुपालनप्रतिवेदनं याचितम् अस्ति। गुरुवासरे शिक्षानिदेशकेन सर्वेभ्यः जिला- उपनिदेशकेभ्यः उक्तं यत् ते षष्ठवर्गात् प्रवक्तारः कुत्र कुत्र न पाठयन्ति इति द्वयोः दिवसयोः अन्तः सूचनां ददतु। एतादृशानां प्रवक्तॄणां सूची निदेशालयं प्रति प्रेषयितुं कथितम् अस्ति। ये विद्यालयीयप्रवक्तारः निर्देशान् न अनुसरन्ति तेषां विरुद्धं अनुशासनात्मकं कार्यविधिः भविष्यति।

## विद्यालयेषु आयोजितः अस्माकं विद्यालयः अस्माकं स्वाभिमानम् कार्यक्रमः

'अस्माकं विद्यालयः अस्माकं तीर्थः' इति भावनया सम्बद्धतायाः उद्देश्येन गुरुवासरे अखिलभारतीय-राष्ट्रीयशैक्षिकसङ्घस्य आश्रयेण हिमाचलप्रदेशस्य १०,७८३ विद्यालयेषु संकल्पकार्यक्रमस्य आयोजनं कृतम्। प्रदेशशिक्षकसङ्घस्य राज्याध्यक्षः विनोदसूदः अवदत् यत् एषः कार्यक्रमः अस्य अभियानस्य गिनीजबुक् ऑफ वर्ल्ड रिकार्डस इत्यत्र पञ्जीकरणाय, बालकानां शिक्षकाणां च मध्ये स्वविद्यालयस्य प्रति आत्मसम्मानस्य भावः प्रकटयितुं च आयोजितः अस्ति। अस्मिन् राज्यस्य प्रायः ८ लक्षं छात्राः, ३५,००० तः अधिकाः शिक्षकाः च भागं गृहीतवन्तः। कार्यक्रमे राज्यस्य सर्वेषु शिक्षकेषु छात्रेषु च महान् उत्साहः आसीत् इति राज्यस्य मीडियाप्रमुखः शशिशर्मा अवदत्।

# मुख्यमन्त्रिणा सुखविन्द्रसिंहसुक्खुना षोडशतमस्य वित्तायोगस्य अध्यक्षस्य समक्षे हिमाचलप्रदेशस्य अधिकारस्य विषयः प्रस्तुतः



**हिमसंस्कृतवार्ताः- डॉ. पद्मनाभः, शिमला।** हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्द्रसिंहःसुक्खुः गुरुवासरे नवदेहलीं गत्वा षोडशतमस्य वित्तायोगस्य अध्यक्षेन डॉ. अरविन्द पनगढ़िया इत्यनेन सह सम्मिलितवान्। तस्मिन् समये सः वित्तायोगाध्यक्षस्य समक्षे हिमाचलप्रदेशसम्बद्धान् विषयान् प्रस्तुतवान्। प्रथम-अप्रैल २०२६ तः प्रवर्तिष्यन्ते वित्तायोगनियमाः इत्यस्मात् सः आग्रहं कृतवान् यत् अग्रिमकाले प्रदेशेन सह न्यायः कार्यः स्यात्। प्रथम-अप्रैल २०२१ तः आरभ्य ३१ मार्च २०२६ यावत् हिमाचलप्रदेशाय ३७१९९ कोटि रूप्यकाणां राजस्वहानि-अनुदानं निश्चितम्। वर्षे २०२१-२२ वर्षमध्ये १०२४९ कोटिरूप्यकाणि दत्तानि, २०२२-२३ मध्ये तु ११४३१ कोटि रूप्यकाणि प्राप्तानि। किन्तु २०२२-२३ तस्यैव वर्षे एतद् अनुदानं केवलं ९३७७ कोटि रूप्यकाणि प्राप्तानि। २०२३-२४ मध्ये ८०५८ कोटिरुप्यकाणि, २०२४-२५ मध्ये ६२५८ कोटिरुप्यकाणि, २०२५-२६ वर्षे तु ३२५७ कोटिरुप्यकाणि एव प्राप्तानि। मुख्यमन्त्री पूर्वमेव अपि वित्तायोगाध्यक्षस्य समक्षे उक्तवान् यत् राजस्वहानि-अनुदानं न पर्याप्तम्। सः पंचायतीराजसंस्थाभ्यः नगरनिकायभ्यश्च दत्तव्यं वित्तसहाय्यं विषयं अपि प्रमुखतया उद्भावितवान्। मुख्यमन्त्री सुखविन्द्रसिंहसुक्खुः इत्यस्मात् कांग्रेसदलस्य केन्द्रीयनेतृभिः अपि मिलितुं शक्नोति। सः तत्र कांग्रेसाध्यक्षस्य विषयं अपि स्पष्टं कर्तुं शक्नोति। मुख्यमन्त्री सायं वा शुक्रवासरस्य मध्याह्ने शिमलां प्रत्यागच्छेत्।

# हिमाचलप्रदेशे चिकित्सामहाविद्यालयस्य १९ छात्राभ्यः सह दुराचारस्य आरोपेण सुरक्षा-रक्षकः निलम्बितः, प्रबन्धनेन कृतं कार्यम्


सांकेतिक चित्रम्

**हिमसंस्कृतवार्ताः - डॉ पद्मनाभः नाहनम् ।** हिमाचलप्रदेशस्य नाहन-चिकित्सामहाविद्यालये कार्यरतेन एकेन सुरक्षा-रक्षकेन छात्राभ्यः सह दुराचारः कृत इति आरोपः अभवत्। ततः, विषयः प्रबन्धनस्य संज्ञानं प्राप्तः इति क्षणे एव महाविद्यालय-प्रबन्धनेन सुरक्षा-रक्षकः निलम्बितः कृतः।

वार्तानुसारं सप्ताहस्य पूर्वं छात्राभिः महाविद्यालय-प्रबन्धनस्य समीपे सुरक्षा-रक्षकस्य विरुद्धं उपालम्भः दत्तः आसीत्। तस्मिन् उपालम्भपत्रे दुराचारः, दूरभाषसंख्यानां याचनम् इत्यादयः आरोपाः लिखिताः आसन्।

विषये संज्ञानं प्राप्ते प्रबन्धनं शीघ्रं क्रियाशीलं जातम्। महाविद्यालयस्य आन्तरिक-अन्वेषणम्-समित्या अपि विषयः परीक्षितः। तस्मिन्नेव समये सुरक्षा-रक्षकः निलम्बितः अपि कृतः। प्रबन्धनं स्वस्तरेण अन्वेषणम् समाप्य ततः परं प्रतिवेदनं पुलिसे समर्पितम्। पुलिसेन अपि प्रतिवेदनम् आधारेण अपराध-पत्रं पञ्जीकृत्य स्वस्तरेण अन्वेषणम् आरब्धम्। कथ्यते यत् एकया छात्रया सह दुराचारः जातः, तया अपि अन्याभ्यः छात्राभ्यः विषयः उक्तः। ततः परम् अन्याः अष्टादशछात्राः अपि तादृशान् आरोपान् अकुर्वन्। एतस्मात् परं विषयस्य पटाक्षेपः जातः।उक्तं च यत् यस्मिन् सुरक्षा-रक्षके आरोपः आरोपितः, सः विवाहितः अस्ति, तस्य द्वौ अपि पुत्रौ स्तः। डीएसपी मुख्यालये रमाकान्तः ठाकुरः उक्तवान् यत् वैद्यकीयमहाविद्यालयस्य आन्तरिक-अन्वेषणम्-समित्याः प्रतिवेदनं प्राप्तम्। तस्य आधारेण अपराधः पञ्जीकृतः, अन्वेषणमपि आरब्धम्। उन्नविंशतिः छात्राः सुरक्षा-रक्षकस्य विरुद्धं आरोपं कृतवत्यः। वैद्यकीयमहाविद्यालयस्य चिकित्साऽधीक्षिका डॉ॰ सङ्गीता ढिल्लो अपि उक्तवती यत् विषयः संज्ञानं प्राप्तः इत्येव आन्तरिक-समित्या अन्वेषणम् कृतम्, प्रतिवेदनं च आगामी-कार्याय पुलिसाय समर्पितम्।

## मुख्यमन्त्रिणा बी. आर. ओ. सैनिकस्य पवनकुमारस्य निधनम् प्रति शोकः व्यक्तः

मुख्यमन्त्री सुखविन्द्रसिंहसुक्खुः इत्यनेन अरुणाचलप्रदेशे घटितायां मार्गदुर्घटनायां सीमा-मार्ग-संघटनस्य सैनिकः पवनकुमारः निधनं प्राप्तः इति दुःखं व्यक्तम्। पवनकुमारः बिलासपुरजनपदस्य श्रीनयनादेवी-तहसील्-दगराहण-ग्रामनिवासी आसीत्। मुख्यमन्त्री उक्तवान् यत् प्रदेशसर्वकारः अस्मिन् दुःखकाले शोकसन्तप्तपरिवारेण सह अस्ति तथा तान् सर्वान् यथाशक्ति साहाय्यं दास्यति। सः ईश्वरं प्रार्थितवान् यत् दिवंगतस्य आत्मनः शान्तिं प्राप्नुयात्, शोकसन्तप्तपरिवाराय च अस्य अपूर्णीयहान्याः सहनशक्तिः प्रदीयताम्।

# विपक्षस्य नेता जयरामठाकुरः आपदाप्रबन्धनस्य विषये काङ्ग्रेससर्वकारं लक्ष्यीकृतवान्



**हिमसंस्कृतवार्ताः - चम्बा।** राज्यसर्वकारः न आपदानिवारणविषये गम्भीरः अस्ति, न च उद्धाकार्यं प्रभावीरूपेण कार्यान्वितं भवति। यद्यपि कस्यचित् आज्ञानुसारं आपदा न आगच्छति न च स्थगयति, परन्तु आपदः निवारणार्थं सज्जता कर्तुं शक्यते । विपक्षस्य नेता जयरामठाकुरः चम्बानगरे पत्रकारसम्मेलने एतत् उक्तवान्। विगतत्रिवर्षेभ्यः आपदा विनाशं कुर्वती अस्ति, परन्तु उद्धारस्य, आश्रयस्य च किमपि सज्जता सर्वकारेण न कृता । यदा मानसून-शीतकालः आगच्छति तदा सर्वकारः उच्चस्तरीयसमागमं कृत्वा सज्जतायाः समीक्षां करोति । ऋतुविज्ञानविभागेन विमोचितानाम् विवरणानां तस्य सज्जतायाः च मूल्याङ्कनं भवति, परन्तु यस्मिन् सर्वकारे व्यवस्थां परिवर्तयति स्म, तस्मिन् समये मानसूनात् पूर्वं सज्जतायाः समीक्षायै कस्यापि उच्चस्तरीयसमागमस्य विषये सूचना नासीत् एतेन सर्वकारस्य संवेदनशीलता ज्ञायते । सः आरोपितवान् यत् यदा आपदा आगता तदा आश्रमकार्यस्य त्वरिततां कर्तुं स्थाने सर्वकारः पूर्वसर्वकारस्य दोषं कृतवान्।जयरामठाकुरः चम्बा इत्यस्य मणिमहेशयात्रायाः उदाहरणम् उद्धृत्य अवदत् यत् यदा सः सदनं सूचितवान् यत् १०,००० तः अधिकाः जनाः अटन्ति तदा उपमुख्यमन्त्री उक्तवान् यत् एतद् विवरणम् अनुचितम् अस्ति। परन्तु कतिपयेभ्यः दिनेभ्यः अनन्तरं सर्वकारेण एव स्वीकृतं यत् १५,००० तः अधिकाः जनाः अटन्ति, येन सिद्धं भवति यत् सर्वकारस्य समीपे स्थितिविषये सम्यक् सूचना नासीत् जयरामठाकुरः अपि आरोपितवान् यत् सर्वकारेण निरुद्धाः यात्रिकाः स्वभाग्ये त्यक्ताः, निजी कम्पन्यः उद्धारस्य नामधेयेन जनेभ्यः स्वेच्छीकीं राशिं गृह्णन्ति। जयरामठाकुरः अवदत् यत् भारतीयजनतापक्षः केन्द्रसर्वकारः च आपदापीडितानां निरन्तरं साहाय्यं करोति। सः त्रिपुरातः आगच्छन्तीं आश्रयसामग्रीं, भाजपा कार्यकर्तृभिः क्रियमाणस्य आश्रयकार्यस्य च उल्लेखं कृतवान्। सः अवदत् यत् हिमाचलस्य इतिहासे प्रथमवारं एकः प्रधानमन्त्री आपदाप्रभावितक्षेत्राणां भ्रमणं कृतवान्, तत्क्षणमेव केन्द्रेन १५०० कोटिरूप्यकाणां साहाय्यं कृतम्। तदपि राज्यसर्वकारः प्रधानमन्त्रिणः प्रति कृतज्ञतां प्रकटयितुं स्थाने केन्द्रं साहाय्यं न करोति इति आरोपं कुर्वन् अस्ति, यत् लज्जाजनकम् अस्ति।

# बिहार-लोक-सेवा-आयोगस्य ७१तमायाः संयुक्त- (प्रारम्भिक) प्रतियोगिता-परीक्षायाः आयोजनस्य विषये संयुक्तवक्तव्ये निर्देशाः प्रदत्ताः



**हिमसंस्कृतवार्ताः- कुणालपाण्डेयः मोतिहारी।** मोतिहारी-नगरस्य पूर्वी-चम्पारण-समाहरणालये डॉ. राजेन्द्रप्रसाद-सभागारे १३ सितम्बर २०२५ तमे दिने आयोज्यमानायाः बिहार-लोकसेवा- आयोगस्य ७१ तमायाः संयुक्त- (प्रारम्भिक) प्रतियोगिता- परीक्षायाः सन्दर्भे जिलाधिकारी श्रीमान् सौरभ जोरवालः, पुलिस-उपरीक्षकः श्रीमान् स्वर्णप्रभातः च संयुक्त-वक्तव्यं कृतवन्तौ।

एषा परीक्षा १३.०९.२०२५ तमे दिने मध्याह्ने १२:०० वादनात् अपराह्ने २:०० वादनपर्यन्तं एकस्मिन्नेव पाली आयोजिताः भविष्यति। अस्मिन् जनपदे ३३ परीक्षा-केन्द्राणि निर्मितानि, यत्र २०१२४ परीक्षार्थिनः भागं ग्रहीष्यन्ति। मोतिहारीनगरं तुरकौलिया, सुगौली, ढाका, बाराचकिया, अरेराजप्रदेशे च परीक्षाकेंद्राणि स्थितानि सन्ति।परीक्षार्थिनां परीक्षाकेंद्रेषु प्रवेशः प्रातः ९:३० वादनात् प्रारभ्यते, किन्तु प्रातः ११:०० वादनन्तरं प्रवेशः न दास्यते। प्रवेशे सर्वेषां परीक्षार्थिनां कटकटया निरीक्षणं भविष्यति।जिलाधिकारी महोदयेन उक्तं यत् सर्वे प्रतिनियुक्ताः वीक्षकाः, दण्डाधिकारिणः, पुलिस-पदाधिकारिणः च समये उपस्थिताः स्युः। परीक्षाकेंद्रेषु जामर- यन्त्राणि,दर्शनीय-कैमेरा-यन्त्राणि च स्थापितानि भविष्यन्ति। परीक्षानियन्त्रणकक्षः, आयोगस्य पटनाकक्षः च सर्वान् क्रियाकलापान् प्रत्यक्षं निरीक्षिष्यतः।विधिव्यवस्थारक्षणार्थं पर्याप्तः सशस्त्रबलः अपि नियुक्तः। परीक्षार्थिनः केवलं प्रवेशपत्रं लेखनीं च गृहीत्वा प्रवेशं प्राप्स्यन्ति। चलभाषः, घटी अन्यानि विद्युत्-उपकरणानि वा आनेतुम् अनुमतिः न भविष्यति।परीक्षार्थिनः स्व-आबण्टितप्रवेश पत्रानुसारं उपविश्यन्ति, यत्र जैविक-सत्यापनं (biometric verification) चित्राङ्कनं च भविष्यति। एकस्मिन् उपवेशिकायाम् अधिकतमं द्वौ परीक्षार्थिनौ एव उपविश्येते।कस्यापि वीक्षकस्य, दण्डाधिकारिणः वा, कर्मिणः वा दूरभाषयन्त्रं वा अन्यं उपकरणं वा स्वयम् उपभोगाय अनुमतिः न दास्यते। परीक्षा-केंद्रस्य ५०० गजपरिधेः अन्तर्गतं सम्पूर्णपरीक्षाकालपर्यन्तं दण्डप्रक्रियासंहिता- १४४ धारा भविष्यति।पुलिस- उपरीक्षकः उक्तवान् यत् "एषा बिहारराज्यस्य अतीव महत्वपूर्णा संवेदनशीलाऽपि परीक्षा अस्ति। सर्वे नियुक्ताः दण्डाधिकारी- पुलिस-पदाधिकारीणश्च परीक्षायाः गम्भीरतां मनसि स्थापयन्तु। प्रवेशद्वारे अपि स्थाप्यते, महिला- आरक्षका अपि निरीक्षणं भविष्यति।"संयुक्तवक्तव्ये अपरसमाहर्ता मुकेशकुमार सिन्हा अपि सम्बोधितवान्। अस्मिन् अवसरः उपसमाहर्त्री सुश्री प्रियारानी, जिला-शिक्षा-पदाधिकारी श्रीमान् राजनगिरिः, सदर वरिष्ठ-उप-समाहर्ता श्रीमान् अमरेशकुमारः, श्रीमान् यशवंतकुमारः, श्रीमान् नित्यमकुमारगौरवः च सह सर्वे प्रतिनियुक्ताः दण्डाधिकारी-पुलिस-पदाधिकारी च उपस्थिताः आसन्।

# गणेशपूजनम्



**दीक्षितमानसी**

शिवपार्वत्योःपुत्रोऽयम्  
कार्तिकयस्यानुजो वै  
रिद्धिसिद्ध्योः स्वामी च  
विघ्नहर्ता तु भक्तानाम्।  
प्रत्येकं देवतापूजने  
आदौ गणेशपूजनम्।  
सदा निर्विघ्नपूजनार्थम्  
जनाः नमन्ति विघ्नहरम्।।  
सार्धैकपञ्चसप्तदिनात्मकम्  
प्रायशः दशदिनात्मकमेव।  
आचर्यते सर्वत्र महोत्सवम्  
चतुर्दशीं भवति विसर्जनम्।।  
प्रतिदिनं नैवेद्याय मिष्ठान्नम्  
तैथव भजनं च कीर्तनम्।  
नयनरम्यसज्जीकरणम्  
विद्वद्भिः समाजप्रबोधनम् ।।  
अधुना तु विदेशेष्वपि  
भवति गणेशपूजनम्।  
संस्कृतेः परिचयोऽस्माकम्  
अस्मितायाः उत्सवोऽयम्।।  
देशान्तरात् यथा पुत्रः  
पितरौ मेलितुमायाति।  
मोदमाना माता लालयति  
मिष्ठान्नभोजनेन प्रतिदिनम्।।  
तथैव याति शिवसूतः  
भक्तानामाह्वाहनेन।  
जनाः लालयन्ति तम्  
तदा पुत्रवत् हेरम्बम्।।  
पुत्रः यदा प्रयाति देशान्तरम्  
दत्त्वा सजलनयनोरनुज्ञाम्  
वदतः मातापितरौ तदा तम्  
पुनरागच्छतु भो सत्वरम्।।  
तथैव विसर्जनसमये  
सलिलपूर्णनेत्राभ्याम्।  
प्रार्थयन्ति भक्ताः गणेशम्  
पुनरागमनाय प्रतिवर्षम्।।

# हिन्दी-संस्कृतशिक्षकाणां विशाल-आन्दोलनम्



**हिमसंस्कृतवार्ताः,शास्त्री अधरः।** ओडिशाप्रदेशे हिन्दि-संस्कृतशिक्षकैः विशाल-आन्दोलनं राजधानी-भुवनेश्वरनगरस्य लोयर-पि.एम्.जी. नामकस्थाने कृतम्। अस्मिन् विशाले आन्दोलने हिन्दी-संस्कृतशिक्षकाः प्रायः षड् सहस्राः उपस्थिताः आसन्। अस्मिन् आन्दोलने हिन्दीशिक्षकसंघस्य सभापतिः आसीत् श्री एस्. के. सुमनमहोदयः तथाच उत्कल-प्रशिक्षित-संस्कृतसंघस्य सभापतिः आसीत् श्री विजय कुमार त्रिपाठी महोदयः । एतयोः द्वयोः संघस्य ओडिशासर्वकारस्य समीपे अभियाचनासीत् -हिन्दीसंस्कृतशिक्षकाणां कृते प्रशिक्षित स्नातकपदवीमान्यता-इति । सर्वकारः अस्मिन् विषये सचेतनमस्ति, तथाच सकरात्मकवार्त्तां दत्तवान्। वहुशीघ्रं हिन्दी-संस्कृतशिक्षकाः प्रशिक्षितस्नातकपदवीमान्यतां प्राप्स्यन्तीति वार्त्ता प्रसारिता भवति।

# ओडिशाप्रदेशे

## नियुक्तिपरीक्षाशुल्कव्यवस्था



हिमसंस्कृतवार्ताः- शास्त्री अधरः, ओडिशाप्रदेशः। गतदिवसे नियुक्तिप्रक्रियायाः सुव्यवस्थितीकरणाय तथा च केवलं यथार्थतया इच्छुकाः योग्याः च अभ्यर्थिनः एव आवेदनं कुर्वन्ति इति सुनिश्चित्य ओडिशामन्त्रिमण्डलेन नियुक्तिपरीक्षाणां परीक्षाशुल्कं प्रवर्तयितुं निर्णयः कृतः।

ओडिशामन्त्रिमण्डलेन निष्पत्तिः कृता यत्- सर्वासु नियुक्तिपरीक्षासु परीक्षाशुल्कं ओडिशासर्वकारः नेष्यति। सामान्यवर्गीय- अन्यपृष्ठवर्गीयछात्राणां कृते परीक्षाशुल्कं देयम्। अपिच परीक्षायाः अनन्तरं परीक्षाशुल्कं ओडिशासर्वकारः छात्रेभ्यः पुनर्ददाति। यथा रेलमार्गपरीक्षासु भवति।।

# हास्यकणिका


**डॉ.विदुषी अग्रवालः**

पुत्रस्य एवं मातुः मध्ये वार्तालापः - महाकुम्भं प्रति गन्तुं न आवश्यकम् 😄

--------------------



पुत्रः - पुनः कुम्भः कदा आगमिष्यति? महाकुम्भं प्रति कदा गन्तुं शक्ष्यामि?  
माता - किमर्थम्?  
पुत्रः - पापं प्रक्षालयितुम्।  
माता - पापं प्रक्षालयितुं किमर्थं महाकुम्भं प्रति गन्तुम् इच्छति,  
भवतः सर्वानां पुरातनानां पापानां विषये भवतः पत्नीं यदि अहं वदिष्यमि तु सा सम्यक् रूपेण त्वां अत्र प्रक्षालिष्यति  
पुत्रः 🙄 😳 🤯 😵 🥴




# श्रीमद्भागवतप्रवचनम्- ३०

✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

अस्य मण्डपस्य किञ्चिद् ऊर्ध्वभागे सप्तलोकाः परिकल्पनीयाः, तत्र च विरक्तविप्राः आहूय स्थापनीयाः। पुरोभागे तेषां कृते यथोचितम् आसनानि स्थापनीयानि। तेषां पृष्ठतः कथावक्तुः कृते एकं दिव्यं सिंहासनं परिकल्पनीयम्। यदि कथावक्ता उत्तराभिमुखः स्यात्, तदा श्रोतारः पूर्वाभिमुखाः सन्तः उपविशन्तु, एवं यदि वक्ता पूर्वाभिमुखः भवेत्, तदा श्रोतारः उत्तराभिमुखाः भवेयुः। अथवा, वक्ता वा, श्रोता वा पूर्वाभिमुखः भवेत्। देशकालादिज्ञातरः महानुभावाः नियमम् एनम् अवदन्। यः वेदशास्त्रं सम्यक् व्याख्यातुं समर्थः स्यात्, विविधं दृष्टान्तं प्रदातुमर्हः, विवेकी, अत्यन्तं निःस्पृहः च स्यात्, एतादृशः विरक्तः विष्णुभक्तः हि तत्र वक्तृरूपेण नियोजनीयः। परन्तु यदि कश्चन पण्डितः चेदपि नितरां धर्मविभ्रान्तः, स्त्रीलम्पटः, पाखण्डवादी च स्यात्, एतादृशः अपात्रजनः श्रीमद्भागवतस्य कथावक्तृरूपेण न नियोजनीयः कदाचिदपि। वक्तुः समीपे हि तस्य साहाय्यार्थम् एकः विद्वान् विप्रः स्थापनीयः। सः अपि सर्वप्रकारेण संशयनिवारणार्थं समर्थः, जनान् सम्यग्बोधयितुं च कुशलः स्यात्।

कथाप्रारम्भदिनात् दिनैकपूर्वं व्रतग्रहणार्थं वक्त्रा क्षौरं प्रकर्तव्यम्। एवम् अरुणोदयात् पूर्वं शौचनिवृत्तः भूत्वा सम्यक् स्नानं समाचरेत्। तथा सन्ध्यादिनित्यकर्म संक्षेपेण सम्पाद्य, विघ्ननिवृत्यर्थं श्रीगणेशस्य पूजनं कुर्यात्। तदनन्तरं पितृतर्पणं विधाय, प्राक्तनेभ्यः पापेभ्यः मुक्तिं, शुद्धिं च लब्धुं प्रायश्चितं कुर्यात्। तदनन्तरम् एकं मण्डलं विधाय तत्र श्रीहरिविग्रहं संस्थापयेत्। पुनः भगवन्तं श्रीकृष्णमुद्दिश्य मन्त्रोच्चारणपूर्वकं षोडशोपचारविधिना क्रमशः पूजयेत्, तत्पश्चात् प्रदक्षिणनमस्कारैः सह एवं स्तुतिं कुर्यात्- "हे करुणानिधे! अहं संसारसागरे निमज्जितः अत्यन्तं दीनोऽस्मि। कर्मणां मोहरूपः ग्राहः मां ग्रसन्नस्ति। अतः त्वं कृपया अस्मात् भवार्णवात् माम् उद्धर प्रभो!" इति। तदनन्तरं धूपदीपनैवेद्यादिभिः उपचारैः श्रीमद्भागवतग्रन्थस्य अपि महता उत्साहेन, एवं प्रीतिपूर्वकं, विधिसहितञ्च पूजनं कुर्यात्। पुनः पुस्तकस्य पुरोभागे श्रीफलं संस्थाप्य, नमस्कृत्य च प्रसन्नचेतसा एवं स्तुतिं कुर्यात्- "हे प्रभो! श्रीमद्भागवतं तवैव स्वरूपमस्ति, अर्थात् ग्रन्थरूपेऽस्मिन् साक्षात् त्वं श्रीकृष्णचन्द्रः हि विराजमानोऽसि। नाथ! भवसागरतः विमोक्तुं मया तव शरणं गृहीतमस्ति। मम मनोरथमेनं त्वां विना नान्यः कोऽपि निर्विघ्नतया तथा साङ्गोपाङ्गत्वेन च पूर्णीकुर्यात्। केशव! दासोऽस्म्यहं तव।" इति शुभम्।(माहात्म्यम्- ०६/१६-३१)

# अध्येता इत्यस्य वार्ता:




हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

**नन्दिनी**- नमो वः। अद्यतने 'अध्येता' इत्यस्य वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या**- नमस्ते नन्दिनि! अद्यतन-मुख्यतासु प्रथम-वार्ताम् पश्यामः। भारतस्य पञ्चदशतम-उपराष्ट्रपति-रूपेण सि.पि. राधाकृष्णन-महोदयः निर्वाचितः जातः, सः सेप्टेम्बर-मासस्य द्वादश्यां शपथं गृह्णीयात्।

**नन्दिनी**- निर्वाचितस्य नूतन-उपराष्ट्रपति-महोदयस्य विषये श्रुत्वा हृदयं प्रसीदति। इयं तु भारतस्य गौरवस्य वार्ता। अधुना द्वितीय-प्रमुख-वार्तां श्रोतुं उत्सुका अस्मि।

**काव्या**- आम्, नन्दिनि! द्वितीय-वार्ता इत्थं वर्तते यत् भारतं शांघाई-सहयोग-संस्थायाम् आतङ्कवाद-विरोधिन्यां संस्थां पहलगाम-आक्रमणस्य आयोजकान् उत्तरदायिनः कर्तुं प्रार्थितवत् अभूत्।

**नन्दिनी**- एषा तु महत्त्वपूर्ण-वार्ता अस्ति यत् भारतम् आतङ्कवादिनः प्रति दृढं पदं गृहीतवत् अस्ति। अधुना तृतीय-प्रमुख-वार्तां शृण्मः।

**काव्या**- आम्, नन्दिनि! तृतीय-वार्ता इयं यत् भारतं वर्णभेद-विषये स्विट्ज़रलैंड-देशाय सहायतां प्रस्तावितवत् अस्ति, अल्पसंख्यकानां विषये कृतान् दोषारोपान् च अस्वीकृतवत् अस्ति।

**नन्दिनी**- भारतस्य विदेशनीतिः सुदृढा दृश्यते। अधुना चतुर्थ-प्रमुख-वार्तां पश्यामः।

**काव्या**- आम्, नन्दिनि! प्रधानमन्त्री मोदी इटली-देशस्य प्रधानमन्त्रिणा मेलोन्या सह चर्चां कृतवान् अस्ति। तयोः मध्ये यूक्रेन-युद्धस्य विषये चर्चा जाता, भारत-यूरोपीय-सङ्घस्य व्यापार-सन्धिं च प्रोत्साहितवन्तौ आस्ताम्।

**नन्दिनी**- प्रधानमन्त्रिणोः चर्चा तु महत्त्वपूर्ण-वैश्विक-सम्बन्धानां सूचिका अस्ति। अधुना पञ्चम-प्रमुख-वार्ता का अस्ति?

**काव्या**- आम्, नन्दिनि! पञ्चमी वार्ता इयं यत् भारतस्य विकास-कथायाम् अधिक-महिला-कर्मशक्तेः आवश्यकता अस्ति इति निर्मला सीतारामन्-महोदया उक्तवती अभूत्।

**नन्दिनी**- एताः सर्वाः वार्ताः श्रुत्वा भारतस्य वर्तमान-स्थितिः सुस्पष्टा जाता। धन्यवादाः काव्ये, सम्यक् प्रस्तुतये।

**काव्या**- स्वागतं नन्दिनि! श्रोतृभ्यः अपि धन्यवादाः।

# तर्पणम्




✍ओम ओझा साहित्य विभागकाशी हिन्दू विश्वविद्यालय




तर्पण शब्दः संस्कृतधातोः "तृप्" (सन्तोषे) निष्पन्नः अस्ति। "तृप्" धातोः "णिच्" प्रत्ययः योगे सति "तर्पयति" इति रूपं भवति, यः क्रियापदं भवति। अस्य क्रियायाः भाववाचकं रूपं "तर्पणम्" इत्यस्ति, यत्र "ल्युट्" प्रत्ययः प्रयुज्यते। अतः "तर्पण" इत्यस्य व्युत्पत्तिः- "तृप् + णिच् + ल्युट्" इति रूपेण विहिता। "तर्पणम्" इति शब्दस्य अर्थः सन्तोषकरणम्, तृप्तिकरणम् वा इत्यस्ति। विशेषतः वैदिकपारंपर्ये तर्पणम् इत्युक्ते, जलं तिलांश्च दत्त्वा पितॄन् देवताः ऋषींश्च तृप्तान् करणं सूच्यते। अत्र जलतिलादिकं अर्घ्यरूपेण दत्तं भवति, तत् तेषां सन्तोषाय।

शास्त्रीयदृष्ट्या अपि तर्पणकर्म विष्णु, पितरः, ऋषयः, मातरः, देवाः इत्यादीनां प्रति श्रद्धया समर्पणं भवति। "मनु स्मृतौ" एवं "धर्मसूत्रेषु" अपि तर्पणस्य विशेषं महत्त्वं प्रतिपादितम् अस्ति। तर्पणं कर्तव्यं इति नियमः, विशेषतः अमावास्यायां, श्राद्धदिवसे, महालयपक्षे च दृश्यमानः अस्ति।

एवं तर्पणशब्दः धात्वर्थस्य विस्तारं दर्शयति- केवलं क्रिया न, अपि तु श्रद्धया सह कृतं तृप्तिकरणं, यत् लौकिकं पारलौकिकं च फलं जनयति। पितृणां तृप्तिः सन्ततिः च तस्य मूलं मन्यते। तेन तर्पणं केवलं जलदानं न, अपि तु एकं धार्मिकं, सांस्कृतिकं च कर्म, यत् ऋणत्रयपरिहाराय साधनं भवति।

# "लौकिकन्यायकोशः"

## "तृणरज्जुन्यायः"

एकस्य तृणस्य कापि शक्तिः न भवति। परन्तु यदा अनेकानि तृणानि संभूय तृणरज्जुः निमीयते तदा तस्याः रज्ज्वाः महती शक्तिर्भवति यत् तया गजोऽपि बन्धुं शक्यते। संघटनशक्तेः महत्त्वम् अनेन द्योत्यते।

यथा-

{१} बहूनामल्पसाराणां समवायो दुरत्ययः।

(भोजप्रबन्धे १४५)

{२} तृणैरावेष्टयते रज्जुर्यया नागोऽपि बध्यते।

(सुभाषितम्)

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्